श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

क्षेमं मे कमलापतिर्वितरतु श्रीवेङ्कटाद्रीश्वरः
    कारुण्यामृतवारिधिस्त्रिजगतां क्षेमङ्करो वत्सलः।
श्रीमद्भाष्यकृता सुबोधनिधिना रामानुजस्वामिना
    भक्त्या दत्तपरत्वचिह्नविलसद्बाहुर्महावैभवः॥ **1** ॥

रेखारूपमनोज्ञदिव्यकलशश्रीपाञ्चजन्यध्वज -
    ज्ञानाब्जाङ्कुशकल्पचक्रविलसत्पादारविन्दद्वयम्।
लक्ष्मीदिव्यपदाम्बुजातयुगळीजाज्वल्यमानोल्लस -
    ल्लाक्षालक्षितवक्षसं सुशरणं श्रीवेङ्कटेशं भजे॥ **2** ॥

सद्योजातमनोज्ञपल्लवलसत्पाण्यम्बुजाभ्यां रमा
    बिभ्राणौ सभयं तु यस्य चरणौ संवाहनेऽपि क्लमम्।
शीघ्रं किञ्च सरोरुहारुणतलौ मञ्जीरभूषोज्ज्वलौ
    तं देवं श्रितपारिजातमतुलं श्रीवेङ्कटेशं भजे॥ **3** ॥

ब्रह्मेशादिकिरीटकोटिघटितप्रत्यग्रनानाविध -
    श्रीमद्रत्नमहःप्ररोहनिकरैर्नीराजितश्रीपदम्।
आनन्दाख्यविमानदिव्यनिलये लक्ष्म्या सह क्रीडितं
    साक्षान्मन्मथमन्मथं गुणनिधिं श्रीवेङ्कटेशं भजे॥ **4** ॥

श्रीपादौ चरणागतैः प्रथमतो यस्यावगाह्यौ जनैः
    देदीप्रावमृतायिताविव शिशोर्मातुः स्तनौ श्रीपतेः।
गोत्रायां विपिने वृषाद्रिशिखरे चित्तेऽप्यनन्यात्मनां
    वेदान्ते सममाहितौ तमतुलं श्रीवेङ्कटेशं भजे॥ **5** ॥

अत्यन्तप्रियदर्शनं कमलया प्रारूढवक्षःस्थलं
नानाभूषणभूषितं प्रविलसत्पीताम्बरप्रोज्ज्वलम्।
सर्वाभीष्टवरप्रदं प्रणमतां जाज्वल्यमानप्रभं
बालार्कोज्ज्वलदिव्यरत्नमकुटं श्रीवेङ्कटेशं भजे॥ **6**॥

अम्भोजामृतसिन्धुजातकलशप्रस्पर्धिदिव्याननं
सुभ्रूसुन्दरमध्यचन्द्रविलसत्फालं मनोज्ञस्मितम्।
आकर्णायतलोचनं मणिमयश्रीहारभूषोज्ज्वलं
श्रीवत्साङ्कितवक्षसं श्रितनिधिं श्रीवेङ्कटेशं भजे॥ **7**॥

सर्वज्ञं कलिकल्मषघ्नममलं लक्ष्मीनिवासोरसं
शक्तं सन्नतवत्सलं विधिमुखैर्देवैः सदा वन्दितम्।
संसारार्णवतारकाङ्घ्रियुगळं कन्दर्पकोटिप्रभं
षाड्गुण्यात्मकदिव्यमङ्गलतनुं श्रीवेङ्कटेशं भजे॥ **8**॥

अन्धः पश्यति दुःखिनस्तु सुखिनो मूकः प्रवक्ति स्फुटं
पङ्गुर्धावति वेगतस्तु लभते वन्ध्या च भव्यं सुतम्।
आर्ताश्चापि निरामयास्तु बधिराः शृण्वन्ति सम्यक् ततो
यस्यानुग्रहवैभवेन विमलं श्रीवेङ्कटेशं भजे॥ **9**॥

भक्ताभीष्टदभाष्यकारगुरुणा दत्ताब्जचक्रोज्ज्वल -
द्बाहुं भक्तजनानुभाव्यमनिशं नीलाम्बुदश्यामलम्।
सर्वाधीश्वरता प्रकाशकलसन्मुक्ताकिरीटोज्ज्वलं
राकाचन्द्रमुखं दयागुणनिधिं श्रीवेङ्कटेशं भजे॥ **10**॥

लक्ष्मीगेहभुजान्तरं कलियुगप्रत्यक्षनारायणं
सत्यानन्दचिदात्मकं परिनुतं पश्चाननाद्यैर्बुधैः।
श्रीशेषाचलशृङ्गमङ्गलमहाभूषायितश्रीपदं
सर्वेषां जगतामभीष्टवरदं श्रीवेङ्कटेशं भजे॥ **11**॥

सर्वेषां सुहृदं सुशीलमनघं श्रीमङ्गलाशासनं
कुर्वद्भिः परिशुद्धमानसयुतैः श्रीवैष्णवैः संवृतम्।
बिम्बाभाधरमुद्यदिन्दुवदनं कर्णान्तलोलेक्षणं
श्रीमद्दिव्यललाटपट्टतिलकं श्रीवेङ्कटेशं भजे॥ **12**॥

कौशेयपुष्पितकटीतटमम्बुजाक्षं
कान्ताकुचाम्बुरुहकुङ्मललोलदृष्टिम्।
कन्दर्पदर्पहरसुन्दरदिव्यमूर्तिं
श्रीवेङ्कटेशमगतिः शरणं प्रपद्ये॥ **13**॥

आपादमौलिमभिजातमनोहराङ्ग -
मादित्यकोटिकिरणोज्ज्वलहेतिराजम्।
आताम्रदिव्यमधुराधरपल्लवं च
श्रीवेङ्कटेशमगतिः शरणं प्रपद्ये॥ **14**॥

दिव्यैर्दन्तिकरोपमैर्मृदुतरैः सुस्निग्धवर्णैः शुभैः
नानाभूषणभूषितैः शुभनखैः कल्याणरेखाञ्चितैः।
वृत्तैर्ज्याकिणकर्कशैरभयदैः पीनैश्चतुर्भिः सतां
श्रीमद्बाहुभिरायतैर्विलसितं श्रीवेङ्कटेशं भजे॥ **15**॥

दातारं किल सम्पदां स्वचरणद्वन्द्वाश्रितानां सतां
दैत्यानां तु निघातिनं त्रिजगतां नाथं महावत्सलम्।
सिंहस्कन्धमनेकरत्नरचितश्रीहारवक्षःस्थलं
श्रीमत्पुण्ड्रलसल्ललाटफलकं श्रीवेङ्कटेशं भजे॥ **16**॥

लक्ष्मीनिवास निखिलाश्रितलोकबन्धो
वैकुण्ठनाथ निरवद्यगुणैकसिन्धो।
श्रीवेङ्कटेश भुवि विश्रुतदिव्यकीर्ते
पाहि प्रपन्नमगतिं शरणागतं माम्॥ **17**॥

वरगुणमणिसिन्धुर्वत्सलः श्रीनिवासः
कलशजलधिकन्याप्राणनाथो दयालुः।
मणिवरमणिभूषा वत्सजाज्वल्यमानो
वितरतु मम सौख्यं वेङ्कटेशो मुकुन्दः॥ **18** ॥

कनकमयकिरीटो दिव्यलावण्यसिन्धुः
प्रणतवरदबन्धुः पद्मपत्रायताक्षः।
सुलभचरणयुग्मः स्वाश्रितानां कृपालुः
वितरतु मम सौख्यं वेङ्कटेशो मुकुन्दः॥ **19** ॥

मरतकगिरिमूर्तिर्मङ्गलानां निवासः
स्फटिकमकुटमूर्धा पीतकौशेयवासः।
कनकवलयभूषाप्रोज्ज्वलद्दिव्यबाहुः
वितरतु मम सौख्यं वेङ्कटेशो मुकुन्दः॥ **20** ॥

सरसिजमुखपाणिः सर्वलोकैकनाथः
विकचकमलनेत्रः श्यामलः कोमलाङ्गः।
जलजचरणयुग्मः श्रीनिवासो दयालुः
वितरतु मम सौख्यं वेङ्कटेशो मुकुन्दः॥ **21** ॥

विधिविबुधनियन्ता विश्वभक्तार्तिहन्ता
विनतविविधजातिक्षेमकल्याणमन्ता।
विमलमधुरमन्दस्मेरदिव्याननाब्जो
वितरतु मम सौख्यं वेङ्कटेशो मुकुन्दः॥ **22** ॥

अत्यर्कानलदीप्तमुत्तमपदं वैकुण्ठमत्यद्भुतं
त्यक्त्वानुग्रहकाम्यया प्रणमतां लक्ष्म्या सह क्रीडितः।
श्रीमद्वेङ्कटभूधरे मणिगणैर्नानाविधैर्धातुभि -
र्देदीप्रे भगवान् ममास्तु गुणवान् क्षेमङ्करः सर्वदा॥ **23** ॥

भक्तानां दोषभोग्यः प्रवरगुणनिधिर्मङ्गलानां निवासः
    विख्यातः सर्वधाता सरसिजनयनो वेदवेदान्तवेद्यः।
शेषाद्रौ शेषतल्पे जलधितनयया सार्धमिन्दीवराक्ष्या
    कीडन् देवाधिराजो मम तु वितरतान्मङ्गलं श्रीनिवासः॥ **24** ॥

विधिशिवविबुधेन्द्रप्राणिरक्षैकदीक्षो
    विविधकलिनिहन्ता वत्सलः स्वाश्रितेषु।
श्रुतहृदयनिवासः शीलवान् पङ्कजाक्षो
    विलसतु मम चित्ते वेङ्कटेशो मुकुन्दः॥ **25** ॥

मरतकमणिरत्नस्फाटिकच्छन्नदिव्य -
    प्रवरकनकभूषाभूषितः संश्रितार्थम्।
नयनसुभगदिव्यश्यामकल्याणगात्रो
    विलसतु मम चित्ते वेङ्कटेशो मुकुन्दः॥ **26** ॥

वरद निखिलबन्धो क्षान्तिसौशील्यसिन्धो
    कमलनयन विष्णो शङ्खचक्रासिपाणे।
दिवि भुवि मम बन्धो श्रीपते वेङ्कटेश
    श्रितजनशुभकल्प श्रीनिधे त्राहि दासम्॥ **27** ॥

दिवि भुवि मम सौख्यं सम्प्रयच्छ प्रयच्छ
    श्रुतिशिरसि विदीप्त श्रीनिधे वेङ्कटेश।
चलमतिमविनीतं मां च कन्दर्पवश्यं
    तव किल दयनीयं पाहि पाहि प्रसीद॥ **28** ॥

कलौ लोकनाथ प्रशस्त प्रशस्त
    प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ।
हरे दीनबन्धो प्रसीद प्रसीद
    सदा वेङ्कटेशं स्मरामि स्मरामि॥ **29** ॥

स्वामिपुष्करिणीतीरे श्रीमद्वेङ्कटभूधरे।
वसते रमया सार्धं वेङ्कटेशाय मङ्गलम्॥ 30॥

॥ इति श्रीवेङ्कटेशस्तोत्रं समाप्तम्॥